संस्कृतस्वाध्यायः

## माता-पुत्रयोः सम्भाषणम् - I

द्वितीया विभक्तिः

लोट् म०पु०एक व०

माता - गोविन्द । किं करोषि त्वम् ?

गोविन्दः - पाठं पठामि अम्ब ।

माता -वत्स आपणं गत्वा आगच्छसि किम् ?

गोविन्दः - अम्ब । शीघ्रं लिखित्वा गच्छामि । किम् आनयामि ततः ?

माता - वत्स । आपणं गत्वा लवणं, शर्करां, तण्डुलं, गुडं द्विदलञ्च आनय ।

गोविन्दः - भगिनीं वदतु अम्ब । सा किं करोति ?

माता - सा अवकरं क्षिप्त्वा पात्रं प्रक्षालयति । द्रोण्यां जलं पूरयति । भूमिं वस्त्रेण मार्जयति । पुष्पाणि आनिय मालां करोति । एवं तस्यां बहूनि कार्याणि सन्ति भोः ।

गोविन्दः - ममापि पठनं बहु अस्ति ।

माता - दशनिमेषाभ्यन्तरे आपणं गत्वा आगच्छ । अनन्तरं पाठान् पठ ।

गोविन्दः - तर्हि शीघ्रं धनं स्यूतं च ददातु अम्ब ।

माता -आगमनसमये द्वौ कूर्चौ, अग्निपेटिके, संमार्जन्यौ च आनय ।

गोविन्दः - द्वौ स्यूतौ ददातु, धनम् अधिकं ददातु, चाकलेहान् अपि आनयामि......?

माता - अतः एव भवान् शीघ्रं गन्तुम् उद्युक्तः । स्वीकुरु....।